# shrIhanumadvratam

# શ્રીહનુમદ્વ્રતમ્

## Document Information

Text title : hanumadvratam

File name : hanumadvratam.itx

Category : hanumaana, hanuman

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# શ્રીહનુમદ્વ્રતમ્

તત્રાદૌ હનુમદ્વ્રતં કર્તુમારભમાણ આચારાનુસારેણ
વિશિષ્ટાચારપરમ્પરાપ્રાપ્તાં યથાશક્તિદ્રવ્યૈઃ પમ્પાપૂજાં કરિષ્યે ।
ઇતિ સઙ્કલ્પ્ય, માર્ગશીર્ષમાસે શુક્લત્રયોદશ્યાં વ્રતં
કરિષ્યમાણઃ દ્વાદશ્યામેવ નિયતો બ્રહ્મચારી જિતેન્દ્રિયઃ
સમ્યગ્રાત્રિં યાપયિત્વા બ્રાહ્મે મુહૂર્તે ઉત્થાય
કર્તવ્યં સર્વમાલોકયતિ ॥

શૌનક ઉવાચ
હનુમદ્વ્રતસઙ્કલ્પં કર્તુકામોઽબ્રવીજ્જનઃ ।
કસ્મિન્દેશે વ્રતં સમ્યક્કર્તવ્યં વદ સૂતજ ॥ ૧॥

કિં ચ વ્રતં પૂર્વતરૈઃ કુત્રાચરિતમદ્ભુતમ્ ।
સન્તિ સ્થલાનિ બહુધા ગોષ્ઠવૃન્દાવનાદયઃ ॥ ૨॥

વાપીકૂપતડાગાદ્યાઃ કુલ્યાઃ કૃત્રિમવિસ્તૃતાઃ ।
નદ્યો નદાઃ સાગરાદ્યાઃ પર્વતાઃ સરિતો દ્રુમાઃ ।
વિચાર્ય બહુધા તચ્ચ વદ નો વદતાં વર ॥ ૩॥

સૂત ઉવાચ
સાધુ પૃષ્ટં મહાભાગાઃ સમ્યગેવોચ્યતે મયા ।
બહવઃ સન્તિ દેશાશ્ચ પુણ્યાઃ પુણ્યવિવર્ધનાઃ ॥

તથાપિ વક્ષ્યે યદ્ગુહ્યં તચ્છૃણ્વન્તુ મુનીશ્વરાઃ ॥ ૪॥

પૂર્વં હનુમતઃ પૂજા કૃતા પમ્પાસરિત્તટે ।
તસ્માત્ પમ્પાસરિત્તીરે હનુમદ્વ્રતમુત્તમમ્ ॥ ૫॥

નાનાદેશેષુ કર્તવ્યા પમ્પાપૂજા પ્રયત્નતઃ ।
બ્રાહ્મે મુહુર્તે ચોત્થાય શૌચાદિભિરતન્દ્રિતઃ ॥ ૬॥

નિત્યકર્મ સમાપ્યાશુ યોગક્ષેમં સમાવિશેત્ ।

તતશ્ચ પઞ્ચભિર્વાદ્યૈરુપેતો બન્ધુભિર્વૃતઃ ॥ ૭॥

તત્રત્યાં ચ નદીં કાઞ્ચિદ્ગત્વા સ્નાત્વા ચ વાગ્યતઃ ।
અઘમર્ષણમન્ત્રૈશ્ચ શુચિઃ પ્રયતમાનસઃ ॥ ૮॥

સન્ધ્યાવન્દનપૂર્વં ચ નિત્યકર્મ સમાપ્ય ચ ।
પિતૄન્ સન્તર્પ્ય યત્નેન લલાટે તિલકોજ્જ્વલઃ ॥ ૯॥

ષોડશાપ્યુપચારાંશ્ચ પમ્પાયાઃ સર્વતો વ્રતી ॥ ૧૦॥

પમ્પા પૂજા ॥

હેમકૂટગિરિપ્રાન્તજનાનાં ગિરિસાનુગામ્ ।
પમ્પામાવાહયામ્યસ્યાં નદ્યાં હૃદ્યાં પ્રયત્નતઃ ॥ આવાહનમ્
તરઙ્ગશતકલ્લોલૈઃ રિઙ્ગત્તામરસોજ્જ્વલે ।
પમ્પાનદિ નમસ્તુભ્યં ગૃહાણાસનમુત્તમમ્ ॥ આસનમ્
હૃદ્યં સુગન્ધસમ્પન્નં શુદ્ધં શુદ્ધામ્બુસત્કૃતમ્ ।
પાદ્યં ગૃહાણ પમ્પાખ્યે મહાનદિ નમોઽસ્તુ તે ॥ પાદ્યમ્
ભાગીરથિ નમસ્તુભ્યં સલિલેન સુશોભને ।
અનર્ઘ્યમર્ઘ્યમનઘે ગૃહ્યતામિદમુત્તમમ્ ॥ અર્ઘ્યમ્
પમ્પાનદિ નમસ્તુભ્યં મહાપુણ્યે સુશોભને ।
ગોદાવરીજલેનાદ્ય ગૃહાણાચમનીયકમ્ ॥ આચમનીયમ્
દુગ્ધાજ્યેક્ષુરસૈઃ પુણ્યૈર્દધ્નશ્ચ મધુના તથા ।
પઞ્ચામૃતૈઃ સ્નાપયિષ્યે પમ્પાનદિ નમોઽસ્તુ તે । પઞ્ચામૃતસ્નાનમ્
શુદ્ધક્ષીરૈઃ શુદ્ધજલૈર્નારિકેલામ્બુભિસ્તથા ।
પુણ્યૈઃ કૃષ્ણાનદીતોયૈઃ સિઞ્ચામિ ત્વાં સરિદ્વરે ॥ સ્નાનમ્
મહામૂલ્યં ચ કાર્પાસં દિવ્યવસ્ત્રમનુત્તમમ્ ।
પમ્પાનદિ મહાપુણ્યે પમ્પાશોભાતિશોભને ॥ વસ્ત્રમ્
શ્રૌતસ્માર્તાદિસત્કર્મફલદં પાવનં શુભમ્ ।
યજ્ઞોપવીતમધુના કલ્પયે સરિદુત્તમે ॥ યજ્ઞોપવીતમ્
કર્પૂરગુટિકામિશ્રં કસ્તૂર્યા ચ વિમર્દિતમ્ ।
યત્નેન કલ્પિતં ગન્ધં લેપયેઽઙ્ગં સરિદ્વરે ॥ ગન્ધમ્
લક્ષણોક્તાન્હરિદ્રાક્તાનક્ષતાંશ્ચોત્તમાઞ્છુભાન્ ।
પમ્પાનદિ ગૃહાણેમાઞ્છુભશોભાતિવૃદ્ધયે ॥ અક્ષતાન્
અતસીકુસુમોપેતં પઙ્કેરુહદલોજ્જ્વલમ્ ।

કુઙ્કુમં શઙ્કરજટાસમ્ભૂતે સરિદર્પયે ॥ કુઙ્કુમમ્
કજ્જલં ત્રિજગદ્વન્દ્યે મહાપુણ્યે તરઙ્ગિણિ ।
નેત્રયોઃ પાદમનઘં ગૃહ્યતાં સરિતાં વરે ॥ નેત્રાઞ્જનમ્
શતપત્રૈશ્ચ કહ્લારૈઃ કુમુદૈર્વકુલૈરપિ ।
મલ્લિકાજાતિપુન્નાગૈઃ કેવલૈશ્ચાપિ ચમ્પકૈઃ ॥

તુલસીદામભિશ્ચાપિ તથા બિલ્વદલૈરપિ ।
પૂજયામિ મહાપુણ્યે પમ્પાનદિ નમોઽસ્તુ તે ॥ પુષ્પાણિ

અથ અઙ્ગપૂજા ॥

ગોદાવર્યૈ નમઃ પાદૌ પૂજયામિ । કૃષ્ણાયૈ નમઃ ગુલ્ફૌ પૂજયામિ ।
પાપહારિણ્યૈ નમઃ જઙ્ઘે પૂજયામિ । સુભ્રુવે નમઃ જાનુની પૂજયામિ ।
ઉરુતરઙ્ગિણ્યૈ નમઃ ઊરૂ પજયામિ । તડિદુજ્જ્વલજવાયૈ નમઃ કટિં પૂજયામિ ।
અમ્બુશોભિન્યૈ નમઃ નિતમ્બં પૂજયામિ । અણુમધ્યાયૈ નમઃ મધ્યં પૂજયામિ ।
સુસ્તનાયૈ નમઃ સ્તનૌ પૂજયામિ । કમ્બુકણ્ઠ્યૈ નમઃ કણ્ઠં પૂજયામિ ।
લલિતાબાહુરઙ્ગાયૈ નમઃ બાહૂ પૂજયામિ ।
દીર્ઘવેણ્યૈ નમઃ વેણીં પૂજયામિ । સુવક્ત્રાયૈ નમઃ વક્ત્રં પૂજયામિ ।
દુર્વારવારિપૂરાયૈ નમઃ શિરઃ પૂજયામિ । સહસ્રમુખાયૈ નમઃ સર્વાઙ્ગં
પૂજયામિ ॥

સદશાઙ્ગં શુભં દિવ્યં સગુગ્ગુલમનુત્તમમ્ ।
સાજ્યં પરિમલોદ્ભૂતં ધૂપં સ્વીકુરુ પાવને ॥ ધૂપમ્
સાજ્યમગ્નિપ્રકાશોદ્યત્કોટિસૂર્યસમદ્યુતિ ।
પશ્ય દીપં પ્રસન્નાઙ્ગે પમ્પાનદિ નમોઽસ્તુ તે ॥ દીપમ્
શાલ્યન્નં સ્વર્ણપાત્રસ્થં શાકાપૂપસમન્વિતમ્ ।
સાજ્યં દધિપાયસં ચ નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥ નૈવેદ્યમ્
પૂગૈઃ સુશોભનૈશ્ચાપિ નાગવલ્લીદલૈર્યુતમ્ ।
તામ્બૂલં ગૃહ્યતાં દેવિ પમ્પાનદિ નમોઽસ્તુ તે ॥ તામ્બૂલમ્
વ્રતપૂર્તિમહાકીર્તિદિવ્યસ્ફૂર્તિપ્રકીર્તિદમ્ ।
કર્તુકામો વ્રતમિદં સૌવર્ણં પુષ્પમર્પયે ॥ સુવર્ણપુષ્પમ્
પ્રદક્ષિણત્રયં દેવિ પ્રયત્નેન પ્રકલ્પિતમ્ ।
પશ્યાદ્ય પાવને દેવિ પમ્પાનદિ નમોઽસ્તુ તે ॥ પ્રદક્ષિણં
નમસ્તે નમસ્તે વિશાલોજ્જ્વલાઙ્ગે

નમસ્તે નમસ્તે લસત્સત્તરઙ્ગે ।
નમસ્તે નમસ્તે ગિરિપ્રાન્તરઙ્ગે
નમસ્તે નમસ્તે કલદ્ભર્હિરઙ્ગે ॥ નમસ્કારં
અપરાધશતં દેવિ મત્કૃતં ચ દિને દિને ।
ક્ષમ્યતાં પાવને દેવિ પમ્પાનદિ નમોઽસ્તુ તે ॥ ક્ષમાપણમ્
પમ્પાનદિ મહાપુણ્યે તરઙ્ગિણિ ! નમોઽસ્તુ તે ।
ત્વત્તીરે હનુમત્પૂજા કૃતા રામેણ ધીમતા ॥

મનોરથફલાવાપ્તિસ્તસ્યાભીષ્ટં ન સંશયઃ ।
સુગ્રીવેણ ચ તીરેઽસ્મિન્કપિવર્યેણ તે કૃતમ્ ॥

સંસ્કૃતં ચ મનોવાઞ્છા સહસ્તસ્ય બભૂવ સા ।
અતસ્ત્વન્નીરપુલિને કૃતે હનુમતો વ્રતે ॥

શ્રેયાંસિ મમ સર્વાણિ ન વિઘ્નાનિ ભવન્ત્વિહ ।
ઇતિ સમ્પ્રાર્થ્ય પમ્પાખ્યાં નદીં શુભતરઙ્ગિણીમ્ ॥

કલશોદકપાણિશ્ચ ગચ્છેત્ સ્વગૃહમાદરાત્ ॥

ઇતિ પમ્પાપૂજા ॥

દેશકાલૌ સ્મૃત્વા, મયાઽઽચરિતસ્ય વ્રતસ્ય સમ્પૂર્ણફલાવાપ્ત્યર્થં
ભાર્યયા સહ હનુમત્પૂજાં કરિષ્યે । ઇતિ સઙ્કલ્પ્ય
(પીઠસ્ય અધોભાગે)-અતલાય નમઃ । વિતલાય નમઃ । સુતલાય નમઃ ।
રસાતલાય નમઃ । તલાતલાય નમઃ । મહાતલાય નમઃ । પાતાલાય નમઃ ।
તત્ર અગાધસર્વતઃશબ્દાત્મને નમઃ । તત્ર કમલે કમઠાય નમઃ ।
તદુપરિ સહસ્રમણિફણાપ્રકાશમાનશેષાય નમઃ ।
અષ્ટદિગ્ગજેભ્યો નમઃ ।
તદુપરિ ભૂમણ્ડલાય નમઃ । તપોલોકાય । મહર્લોકાય નમઃ ।
સત્યલોકાય । અષ્ટદિક્પાલકેભ્યો નમઃ । તન્મધ્યે મેરવે નમઃ ।
મેરોર્દક્ષિણદિગ્ભાગે દ્રોણશૈલાય નમઃ । તન્મધ્યે સુરતરવે નમઃ ।
તન્મૂલે સુવર્ણવેદિકાયૈ નમઃ । વેદ્યાં વૃક્ષસ્ય પૂર્વભાગે
નવરત્નખચિતચારુરત્નપીઠાય નમઃ ।
(હનુમત્ પીઠે અલઙ્કૃતં કલશં નિધાય)
ૐ નમો ભગવતે વાયુનન્દનાય નમઃ । ઇતિ કલશસ્થાપનમ્ ।
તતઃ દેશકાલૌ સઙ્કીર્ત્ય સીતાસમેતશ્રીરામચન્દ્રધ્યાનાદિ માનસં

કૃત્વા શ્રીહનુમન્તમાવાહયેત્ । પ્રાણપ્રતિષ્ઠાં ચ વિધિવત્કુર્યાત્ ॥

દ્વાદશગ્રન્થિપૂજા -
અઞ્જનાસૂનવે નમઃ પ્રથમગ્રન્થિં પૂજયામિ ।
હનુમતે નમઃ દ્વિતીયગ્રન્થિં પૂજયામિ ।
વાયુપુત્રાય નમઃ તૃતીયગ્રન્થિં પૂજયામિ ।
મહાબલાય નમઃ ચતુર્થગ્રન્થિં પૂજયામિ ।
રામેષ્ટાય નમઃ પઞ્ચમગ્રન્થિં પૂજયામિ ।
ફાલ્ગુનસખાય નમઃ ષષ્ઠગ્રન્થિં પૂજયામિ ।
પિઙ્ગાક્ષાય નમઃ સપ્તમગ્રન્થિં પૂજયામિ ।
અમિતવિક્રમાય નમઃ અષ્ટમગ્રન્થિં પૂજયામિ ।
કપીશ્વરાય નમઃ નવમગ્રન્થિં પૂજયામિઃ ।
સીતાશોકવિનાશનાય નમઃ દશમગ્રન્થિં પૂજયામિ ।
લક્ષ્મણપ્રાણદાત્રે નમઃ એકાદશગ્રન્થિં પૂજયામિ ।
દશગ્રીવદર્પઘ્નાય નમઃ દ્વાદશગ્રન્થિં પૂજયામિ ।
ભવિષ્યદ્બ્રહ્મણેનમઃ ત્રયોદશગ્રન્થિં પૂજયામિ ।

(અઙ્ગ પૂજા)
હનુમતે નમઃ પાદૌ પૂજયામિ ।
સુગ્રીવસખાય નમઃ ગુલ્ફૌ પૂજયામિ ।
અઙ્ગદમિત્રાય નમઃ જઙ્ઘે પૂજયામિ ।
રામદાસાય નમઃ ઊરૂ પૂજયામિ ।
અક્ષઘ્નાય નમઃ કટિં પૂજયામિ ।
લઙ્કાદહનાય નમઃ વાલં પૂજયામિ ।
રામદાસાય નમઃ નાભિં પૂજયામિ ।
સાગરોલ્લઙ્ઘનાય નમઃ મધ્યં પૂજયામિ ।
લઙ્કામર્દનાય નમઃ કેશાવલિં પૂજયામિ ।
સઞ્જીવનીહર્ત્રે નમઃ સ્તનૌ પૂજયામિ ।
સૌમિત્રિપ્રાણદાય નમઃ વક્ષઃ પૂજયામિ ।
કુણ્ઠિતદશકણ્ઠાય નમઃ કણ્ઠં પૂજયામિ ।
રામાભિષેકકારિણે નમઃ હસ્તૌ પૂજયામિ ।
મન્ત્રરચિતરામાયણાય નમઃ વક્ત્રં પૂજયામિ ।
પ્રસન્નવદનાય નમઃ વદનં પૂજયામિ ।

પિઙ્ગનેત્રાય નમઃ નેત્રં પૂજયામિ ।
શ્રુતિપારગાય નમઃ શ્રુતિં પૂજયામિ ।
ઊર્ધ્વપુણ્ડ્રધારિણે નમઃ કપોલં પૂજયામિ ।
મણિકણ્ઠમાલિને નમઃ શિરઃ પૂજયામિ ।
સર્વાભીષ્ટપ્રદાય નમઃ સર્વાઙ્ગં પૂજયામિ ।

દોરગ્રહણમ્
અઞ્જનીગર્ભસમ્ભૂત રામકાર્યાર્થસમ્ભવ ।
વરદાતઃ કૃતા પૂજા રક્ષ માં પ્રતિવત્સરમ્ ।
વ્રતોદ્યાપનં - યજમાનો મહાનદ્યાં માધ્યાહ્નિકસ્નાનં કૃત્વા,
નિત્યકર્મ વિધાયાઽઽચાર્ય-બ્રહ્મઋત્વિગ્ભિઃ સહોપવિશ્ય,
પ્રાણાનાયમ્ય,
અદ્ય શુભતિથૌ ધર્મપત્નીસમેતસ્ય મમ
હનુમદ્-વ્રતકલ્પોક્ત-સમ્પૂર્ણફલાવાપ્તયે
ધર્માર્થ-કામ-મોક્ષ-ચતુર્વિધ-પુરુષાર્થસિદ્ધ્યર્થં
શ્રીમદાઞ્જનેયપ્રીત્યર્થં ચ હનુમદ્વ્રતોદ્યાપનાખ્યં કર્મ કરિષ્યે ।
અસ્મિન્ કર્મણિ આચાર્યત્વં ભવન્તઃ કુર્વન્ત્વિતિ વેદવેત્તારં કુટુમ્બિનં
વિત્તહીનં શાન્તમાચારવન્તં બ્રાહ્મણમાચાર્યત્વે નિયોજ્ય, એવં
લક્ષણસહયુક્તમપરં બ્રાહ્મણં નિયોજ્ય, તતઃ ત્રયોદશકલશાવાહનાર્થં
ત્રયોદશબ્રાહ્મણાનૃત્વિગ્વિધૌ નિયોજ્ય એવમાવરણં કૃત્વા, તતો
નિષ્કમાત્રસુવર્ણેન, તદર્ધેન યથાશક્તિ વા હનુમત્પ્રતિમાં કૃત્વા
પ્રાણાનાયમ્ય, હનુમદ્-વ્રતોદ્યાપનાઙ્ગત્વેન પમ્પાપૂજાં કૃત્વા,
પુનઃ પ્રાણાનાયમ્ય, શુભતિથૌ ધર્મપત્નીસમેતસ્ય મમ
મનોવાઞ્છાફલસિદ્ધ્યર્થં
શ્રીમદાઞ્જનેયપ્રીત્યર્થમાઞ્જનેયપ્રતિમાપૂજાં કરિષ્યે ।
ઇતિ સઙ્કલ્પ્ય,
તત્પ્રતિમાશુદ્ધ્યર્થં પઞ્ચામૃતસ્નપનં કૃત્વા, મૂલમન્ત્રેણ
શુદ્ધોદકસ્નપનં કૃત્વા, પઞ્ચપ્રસ્થપરિમિતશ્વેતતણ્ડુલોપરિ
અલઙ્કૃતપૂર્ણકલશં સંસ્થાપ્ય તદુપરિ પ્રતિમામાધાય
પ્રાણપ્રતિષ્ઠાં કૃત્વા। તતસ્ત્રયોદશકલશાન્
પ્રતિમાવેષ્ટિતાંસ્તણ્ડુલેષુ નિધાય, કલશપૂજાં કૃત્વા,
તેષુ કલશેષુ વસ્ત્રાણ્યાવેષ્ટ્ય, તેષુ નાનાવિધફલાનિ દત્વા,

કલશપૂજાં કૃત્વા, તતઃ પીઠાર્ચનં કુર્યાત્ ॥

પીઠસ્યાધસ્તલે - અતલાય નમઃ । વિતલાય નમઃ ।
સુતલાય નમઃ । રસાતલાય નમઃ । તલાતલાય નમઃ ।
મહાતલાય નમઃ । પાતાલાય નમઃ ।
તથાગાધસર્વતોમુખ-સુધાધિભ્યાં નમઃ । તત્ર કમઠાય નમઃ ।
તદુપરિ - સહસ્રફણિફણામણ્ડિત-મણિપ્રકાશિતાશેષલોકશેષાય નમઃ ।
અષ્ટદિગ્ગજેભ્યો નમઃ । તદુપરિ ભૂમણ્ડલાય નમઃ ।
દિક્પાલેભ્યો નમઃ । તન્મધ્યે મેરવે નમઃ ।
મેરોર્દક્ષિણદિગ્ભાગે રત્નસાનવે નમઃ । તન્મધ્યે સુરતરવે નમઃ ।
તન્મૂલે સુવર્ણવેદિકાયૈ નમઃ । વેદ્યાં વૃક્ષસ્ય પૂર્વભાગે
નવરત્નખચિતનૂતનપીઠાય નમઃ । (એવં ભાવયિત્વા)
સ્વામિન્ ! સર્વજગન્નાથ ! યાવત્ પૂજાવસાનકમ્ ।
તાવત્ ત્વં પ્રીતિભાવેન પ્રતિમાયાં સ્થિરો ભવ ॥

તતસ્ત્રયોદશગ્રન્થિયુક્તદોરકં પ્રતિષ્ઠાપ્ય,
ધ્યાનમ્ -
વન્દે વિદ્યુદ્વલયલસિતં બ્રહ્મસૂત્રં દધાનં,
કર્ણદ્વન્દ્વે કનકવલયે કુણ્ડલે ધારયન્તમ્ ।
સત્કૌપીનં કટિપરિહૃતં કામરૂપં કપીન્દ્રં
નિત્યં ધ્યાયામ્યનિલતનયં વજ્રદેહં વરિષ્ઠમ્ ॥

પ્રતપ્ત-જામ્બૂનદ-દિવ્યમંસં દેદીપ્યમાનાગ્નિવિભાસુરાક્ષમ્ ।
પ્રફુલ્લ-પઙ્કેરુહ-શોભનાસ્યં ધ્યાયે હૃદિસ્થં પવમાનસૂનુમ્ ॥

અથ કલ્પોક્તપ્રકારેણ આવાહનાદિ -ષોડશોપચારાન્ કૃત્વા
નમઃસર્વહિતાર્થાય જગદારાધ્યકર્મણે ।
અમેયાયાઞ્જનેયાય પુનરર્ઘ્યં પુરોઽર્પયે ।
ઇતિ પ્રસન્નાર્ઘ્યં સમર્પયામિ નમઃ ।
ભક્ત્યા પ્રકલ્પિતૈરેતૈરુપચારૈશ્ચ ષોડશૈઃ ।
ભગવન્ હનુમન્નીશ ! પ્રીયતાં મે પ્રિયોક્તિભિઃ ॥

ઉપચારસમર્પણં યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપોયજ્ઞક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ॥

એવં રાત્રૌ પ્રથમયામપૂજાં કૃત્વા,

તસ્યાં રાત્ર્યાં પ્રતિયામપૂજાં કુર્વન્,
ગીતવાદિત્રાદિભિર્મઙ્ગલધ્વનિભિર્ભાગવતપઠનાદિપુરાણ-
શ્રવણાદિભિર્જાગરણં કૃત્વા, પરેદ્યુઃ પ્રભાતે મહાનદ્યાં બ્રાહ્મણૈઃ સહ
સ્નાનં કૃત્વા, નિત્યકર્મ વિધાય ગન્ધાદિભિરલઙ્કૃત્ય, ગૃહમાગત્ય,
પૂર્વવત્પૂજાં કૃત્વા, હનુમદ્વ્રતોદ્યાપનાઙ્ગહોમં કુર્યાત્ ।
ક્ષીરાન્નેનાજ્યેન પિપ્પલસમિદ્ભિઃ કલ્પોક્તદ્રવ્યેણ
મૂલમન્ત્રેણાષ્ટોત્તરસહસ્રમષ્ટોત્તરશતં વા હોમં કુર્યાત્ ।
પૂર્ણાહુતિં દત્વા, બ્રહ્મણે દક્ષિણાં દત્વા, તત આચાર્યં પૂજયિત્વા,
પ્રતિમાં સવસ્ત્રાં સાલઙ્કારાં સતણ્ડુલાં ચ દત્વા, તદ્દાનસાદ્ગુણ્યાર્થં
દક્ષિણાં દત્વા, આચાર્યાય સવત્સાં સાલઙ્કારાં પયસ્વિનીં ગાં દદ્યાત્ ।
તત ઋત્વિગ્ભ્યઃ સવસ્ત્રાન્ કલશાન્ દત્વા દક્ષિણાં ચ દત્વા,
વિશિષ્ટપઙ્ગુદીનાન્ધકૃપણજનાન્ બ્રાહ્મણાન્ સન્તર્પ્ય, ઋત્વિગાદિ-
બ્રાહ્મણાન્ શતં પઞ્ચાશત્, પઞ્ચવિંશતિં ત્રયોદશ વા બ્રાહ્મણાન્
મિષ્ટાન્નભોજનેન સન્તર્પ્ય, ભૂરિદાનં વિભવાનુસારેણ કુર્યાત્ ।
એવં કુર્વન્ યજમાનઃ કૃતાર્થો ભવતિ ।
હનુમાન્ સુપ્રીતો વરદો ભૂત્વા પુત્રપૌત્રાદિ સર્વકામાન્
પ્રયચ્છતિ । ઇતિ શૌનકાદિકાન્ પ્રતિ સૂતઃ પ્રોવાચ । ઇતિ ॥

---

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

---

*shrIhanumadvratam*

pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*